# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा -आचार्यद्वितीयवर्षम्** (SEM-3) | **प्रश्नपत्रम् – ५** | **गुणा: - ७०** |
| **विषय: - साहित्यम्** | (C.E.-5.3.3.) | |
| **दिनाङ्क: - ०८/१२/२०१८** | *ग्रन्थ: हर्षचरितम् - उच्छ्वास:-१* | **समय: -१०.०० त: ०१.००** |

**प्रथमान्विति:**

**प्रश्न: १ निम्नलिखिताभ्यां श्लोकाभ्याम् एकं श्लोकं ससन्दर्भं स्पष्टयत ।** **( ५ )**

*(१) नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्ट: स्फुटो रस:।*
*विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुष्करम्॥*

*(२) सन्ति श्वान इवासंख्या जातिभाजो गृहे गृहे।*
*उत्पादका न बहव: कवय: शरभा इव॥*

**प्रश्न: २** *महाकविबाणभट्टस्य जीवनपरिचयं लिखत।* **( १० )**

*(अथवा)*

*हर्षचरितस्य प्रारम्भे निरूपिता: व्यासभासकालिदास कवीनां विशेषता: वर्णनीया:।*

**द्वितीयान्विति:**

**प्रश्न: ३ अधोलिखितगद्यखण्डाभ्याम् एकं ससन्दर्भं विवेचयन्तु ।** **( ५ )**

*(१) 'ब्रह्मन्, न खलु साधुसेवितोऽयं पन्था: येनासि प्रवृत्त: । निहन्त्येष परस्तात् । उद्दामप्रसृतेन्द्रियाश्वसमुत्थापितं हि रज: कलुषयति दृष्टिमनक्षजिताम् । कियद्दूरं वा चक्षुरीक्षते। विशुद्धया हि धिया पश्यन्ति कृतबुद्धय: सर्वानर्थानसत: सतो वा।*

*(२) अधुना कथय कतम भुवो भागमलङ्कर्तुमिच्छसि। कस्मिन्नवतितीर्षति ते पुण्य भाजि प्रदेशे हृदयम्। कानि वा तीर्थान्यनुग्रहीतुमभिलषसि। केषु वा धन्येषु तपोवनधामसु तपस्यन्ती स्थातुमिच्छसि।*

**प्रश्न: ४ अधस्तनाभ्य: द्वे टिप्पण्यौ लिखत ।** **( १० )**

*(१) ब्रह्मा*
*(२) दुर्वासा-शापप्रसङ्ग:।*
*(३) मन्दाकिनीवर्णनम्।*
*(४) महानद: शोण:।*

**तृतीयान्विति:**

**प्रश्न: ५ निम्नलिखितगद्यखण्डाभ्याम् एकं ससन्दर्भं स्पष्टयत ।** **( ५ )**

*(१) आयुष्मति, सतां हि प्रियंवदता कुलविद्या । न केवलमाननं हृदयमपि च ते चन्द्रमयमिव सुधाशीकरशीतलैश ह्लादयति वचोभि:। सौजन्यजन्यभूमयो भूयसा शुभन सज्जननिर्माणशिल्पकला इव भावदृश्यो दृश्यन्ते।*

*(२) अचिन्तयच्च- 'मर्त्यलोक: खलु सर्वलोकानामुपरि, यस्मिन्नेवं विधानि भवति त्रिभुवनभूषणानि सफलगुणग्रामगुरुणिरत्नानि । तथा हि तस्य मुखलावण्यप्रवाहस्य निष्यन्दबिन्दु:।*

**प्रश्नः ६** *दधीचस्य वर्णनं कुरुत।* **( १० )**

**( अथवा )**

*सावित्री-विकुक्ष्योः संवादं समीक्षयत्।*

**चतुर्थान्वितिः**

**प्रश्नः ७ निम्नलिखितगद्यखण्डाभ्याम् एकं ससन्दर्भं स्पष्टयत । ( ५ )**

*(१) अथ दैवयोगात्सरस्वती बभार गर्भम्। असूत चानेहसा सर्वलक्षणाभिरामं तनयम्। तस्मै च जातमात्रायैव 'सम्यक्सरहस्याः सर्वेवेदाः सर्वाणि च शास्त्राणि च सकलाश्च कला मत्प्रभावात् स्वमाविर्भविष्यन्ति' इति वरमदात्।*

*(२) सा त्ववादीत् – देवि, जानास्येव माधुर्यं विषयाणाम्, लोलुपतां चेन्द्रियग्रामस्य उन्मादितां च नवयौवनस्य, परिप्लवतां च मनसः।* प्रख्यातैव मन्मथस्य दुर्निवारता अतो न मामुपालम्भेनोपस्थातुमर्हसि।

**प्रश्नः ८** *मालत्याः पात्रालेखनं कुरुत।* **( १० )**

**( अथवा )**

*वात्स्यानवंशस्य वर्णनं कुरुत।*

**प्रश्नः ७ अधोलिखितेभ्यः प्रश्नेभ्यः दशप्रश्नानाम् उत्तराणि लिखत । ( १० )**

*(१) प्रवरसेनः केन ग्रन्थेन कीर्तिं लब्धवान् ?*

*(२) तारापतेः भ्राता कः ?*

*(३) सरस्वत्याः सखी का ?*

*(४) सर्वतपसां मूलं किम् ?*

*(५) शैलूषः - इत्यस्य कोऽर्थः ?*

*(६) दधीचस्य मातुः नाम किम् ?*

*(७) च्यवनः कः आसीत् ?*

*(८) अक्षमाला का आसीत् ?*

*(९) सरस्वत्याः पुत्रस्य नाम किम् ?*

*(१०) बाणभट्टस्य जन्म कस्मिन् वंशे अभवत् ?*

*(११) अर्थपतेः कति पुत्राः आसन् ?*

*(१२) बाणस्य मातुः नाम किमासीत् ?*

*(१३) अनङ्गबालसूचीबाणौ कौ ?*

*(१४) हर्षचरिते कति उच्छ्वासाः सन्ति ?*

*(१५) कोपकलुषिता मतिः किं न विमृशति ?*

--००--